श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षण्णवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षण्णवतितमः सर्गः ॥

## वाल्मीकिना सीतायाः शुद्धेः समर्थनम्

तस्यां रजन्यां व्युष्टायां यज्ञवाटं गतो नृपः।
ऋषीन् सर्वान् महातेजाः शब्दापयति राघवः॥ 7.96.1 ॥

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः।
विश्वामित्रो दीर्घतमा दुर्वासाश्च महातपाः॥ 7.96.2 ॥

पुलस्त्योऽपि तथा शक्तिर्भार्गवश्चैव वामनः।
मार्कण्डेयश्च दीर्घायुर्मौद्गल्यश्च महायशाः॥ 7.96.3 ॥

गर्गश्च च्यवनश्चैव शतानन्दश्च धर्मवित्।
भरद्वाजश्च तेजस्वी अग्निपुत्रश्च सुप्रभः॥ 7.96.4 ॥

नारदः पर्वतश्चैव गौतमश्च महायशाः।
कात्यायनः सुयज्ञश्च ह्यगस्त्यस्तपसां निधिः॥ 7.96.5 ॥

एते चान्ये च बहवो मुनयः संशितव्रताः।
कौतूहलसमाविष्टाः सर्व एव समागताः॥ 7.96.6 ॥

राक्षसाश्च महावीर्या वानराश्च महाबलाः।
सर्व एव समाजग्मुर्महात्मानः कुतूहलात्॥ 7.96.7 ॥

क्षत्रिया ये च शूद्राश्च वैश्याश्चैव सहस्रशः।
नानादेशगताश्चैव ब्राह्मणाः संशितव्रताः॥ **7.96.8**॥

ज्ञाननिष्ठाः कर्मनिष्ठा योगनिष्ठास्तथापरे।
सीताशपथवीक्षार्थं सर्व एव समागताः॥ **7.96.9**॥

तदा समागतं सर्वमश्मभूतमिवाचलम्।
श्रुत्वा मुनिवरस्तूर्णं ससीतः समुपागमत्॥ **7.96.10**॥

तमृषिं पृष्ठतः सीता अन्वगच्छदवाङ्मुखी।
कृताञ्जलिर्बाष्पकला कृत्वा रामं मनोगतम्॥ **7.96.11**॥

तां दृष्ट्वा श्रुतिमायान्तीं ब्रह्माणमनुगामिनीम्।
वाल्मीकेः पृष्ठतः सीतां साधुवादो महानभूत्॥ **7.96.12**॥

ततो हलहलाशब्दः सर्वेषामेवमाबभौ।
दुःखजन्मविशालेन शोकेनाकुलितात्मनाम्॥ **7.96.13**॥

साधु रामेति केचित् तु साधु सीतेति चापरे।
उभावेव च तत्रान्ये प्रेक्षकाः सम्प्रचुक्रुशुः॥ **7.96.14**॥

ततो मध्ये जनौघस्य प्रविश्य मुनिपुङ्गवः।
सीतासहायो वाल्मीकिरिति होवाच राघवम्॥ **7.96.15**॥

इयं दाशरथे सीता सुव्रता धर्मचारिणी।
अपवादात् परित्यक्ता ममाश्रमसमीपतः॥ **7.96.16**॥

लोकापवादभीतस्य तव राम महाव्रत।
प्रत्ययं दास्यते सीता तामनुज्ञातुमर्हसि॥ **7.96.17**॥

इमौ तु जानकीपुत्रावुभौ च यमजातकौ।
सुतौ तवैव दुर्धर्षौ सत्यमेतद् ब्रवीमि ते॥ **7.96.18**॥

प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन।
न स्मराम्यनृतं वाक्यमिमौ तु तव पुत्रकौ ॥ **7.96.19** ॥

बहुवर्षसहस्राणि तपश्चर्या मया कृता।
नोपाश्नीयां फलं तस्या दुष्टेयं यदि मैथिली ॥ **7.96.20** ॥

मनसा कर्मणा वाचा भूतपूर्वं न किल्बिषम्।
तस्याहं फलमश्नामि अपापा मैथिली यदि ॥ **7.96.21** ॥

अहं पञ्चसु भूतेषु मनःषष्ठेषु राघव।
विचिन्त्य सीता शुद्धेति जग्राह वननिर्झरे ॥ **7.96.22** ॥

इयं शुद्धसमाचारा अपापा पतिदेवता।
लोकापवादभीतस्य प्रत्ययं तव दास्यति ॥ **7.96.23** ॥

तस्मादियं नरवरात्मज शुद्धभावा
दिव्येन दृष्टिविषयेण मया प्रविष्टा।
लोकापवादकलुषीकृतचेतसा या
त्यक्ता त्वया प्रियतमा विदितापि शुद्धा ॥ **7.96.24** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षण्णनवतितमः सर्गः ॥